||**श्री स्वामी सामर्थ** ||

---

## ||अथ बाह्य शान्ति सूक्तं ||

---

श्री स्वामी समर्थ

नमो वः पितरो, यच्छिव तस्मै नमो, वः पितरो यत् स्योन तस्मै।
नमो वः पितरः,स्वधा वः पितरः।।१।।

नमोऽस्तु ते नैर्ॠते, तिग्म- तेजोऽमस्ययान विचृता बन्ध-पाशान्।
यमो महयं पुनरित् त्वां ददाति।
तस्मै यमाय नमोऽस्तु मृत्युवे।।२।।

नमोऽस्वसिताय नमस्तिरश्चिराजये।
स्वजाय बभ्रवे नमो नमो देव-जनेभ्यः ।।३।।

नमः शीताय, तक्मने, रूराय शोजिषे कृणोमि।
यो अन्वेद्युरूभयद्युरभ्येति, तृतीय-काय नमोऽस्तु तक्मने।।४।।

नमस्ते अधि-वाकाय, परा-वाकाय ते नमः।
सु-मत्यै मृत्यो ते नमो, दुर्मत्यै ते इदं नमः ।।५।।

नमस्ते यातुधानेभ्यो, नमस्ते भेषजेभ्यः।
नमस्ते मृत्यो मूलेभ्यो, ब्राह्मणेभ्यो इदं नमः।।६।।

नमो देव-वधेभ्यो, नमो राजवधेभ्यः।

अधो यें विश्वानां, वधास्तेभ्यो मृत्यो नमोऽस्तु ते ।।७।।

नमस्तेऽस्तु नारदा नुष्ठ विदुषे वशा।
कतमासां भीस-तमा यामदत्वा परा-भवेत्।।८।।

नमस्तेऽस्तु विद्युते, नमस्ते स्तनयित्नवे ।
नमस्तेऽस्तुवश्मने, येना दूडाशे अस्यसि।।९।।

नमस्तेऽस्त्वायते नमोऽस्तु पराय ते।
नमस्ते प्राण तिष्ठत, आसीनायोत ते नमः।।१०।।

नमस्तेऽस्त्वायते नमोςस्तु पराय ते ।
नमस्ते रूद्र तिष्ठत, आसीनायोत ते नमः।।११।।

नमस्ते जायमानायै, जाताय उत ते नमः।
वालेभ्यः शफेभ्यो, रूपायाध्न्येन्ते नमः।।१२।।

नमस्ते प्राणा-क्रन्दाय, नमस्ते स्तनयित्नवे।
नमस्ते प्राणा-विद्युते, नमस्ते प्राण-वर्षते ।।१३।।

नमस्ते प्राणा प्राणाते, नमोऽस्त्वपानते।
पराचीनाय ते नमः,प्रतीचीनाय ते नमः, सर्वस्मैत इदं नमः ।।१४।।

नमस्ते राजन्।
वरूणास्तु मन्यवे,विश्व हयग्र निचिकेषि दुग्धम्।
सहस्रमन्यान् प्रसुवामि, साकं शतं जीवाति शरदस्यवायं।।१५।।

नमस्ते रूद्रास्य ते नमः प्रतिहितायै।

नमो विसृज्य-मनायै, नमो निपतितायै।।१६।।

नमस्ते लाङ्लेभ्यो, नमः ईषायुगेभ्यः।
वीरूत् क्षेत्रिय-नाशन्यप क्षेत्रियमुच्छतु।।१७।।

नमो गन्धर्वस्य, नमसे नमो भामाय चक्षुष च कृण्मः।
विश्वावसो ब्रह्मणा ते नमोςभि जाया अप्सरसः परेहि।।१८।।

नमो यमाय, नमोςस्तु मृत्यवे,नमः पितृभ्य उतते ययन्ति।
उत्पारणस्य यो वेद, तमाग्नि पुरो दधेस्मा अरिष्टतातये।।१९।।

नमो रूद्राय, नमोऽस्तु तक्मने, नमो राज्ञे वरूणायं त्विषीमते।
नमो दिवे, नमः पृथिव्यै, नमः औषधीभ्यः।।२०।।

नमो रूराय च्यवनाय, नोदनाय धृष्णवे।
नमःशीताय, पुर्व काम कृत्वने।।२१।।

नमो वः पितर उर्जे, नमो वः पितरो रसाय।।२२।।

नमो वः पितरो भामाय, नमो वः पितरो मन्यवे।।२३।।

नमो वः पितरो यद-घोरं, तस्मै नमो वः पितरो, यत् क्रूरं तस्मै।।२४।।

।। इति श्री बाह्य शान्ति सूक्तं संपूर्ण ।।

---

॥ श्रीगुरुदत्तात्रेयार्पणमस्तु ॥
॥ श्री स्वामी समर्थापर्ण मस्तु॥

---